यानी **'परमात्मा नराकृतिः'** वचनानुसार जो द्विभुजाकार से विद्यमान हैं एवं सर्वावतारी होने से पुरुष पदवाच्य हैं। श्रीमान् धन धान्यादि रूप श्री से सदा सम्पन्न हैं। अथवा श्री पदवाच्य विदेह कन्या श्रीजानकीजी से सदा नित्ययुक्त हैं। तथा हेय प्रत्यनिक सर्वज्ञत्व वात्सल्यादि अनन्त कल्याण गुणों के सागर रूप हैं। एवं स्थूल सुक्ष्म साधारण चाराचर जगत् का अभिन्न निमित्तोपादन कारण हैं। तथा शरण्य हैं- अर्थात् शरण में आये हुये प्रपन्न पुरुषों के पालक हैं **'सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम'** यह दिव्य वाणी सर्वाभयप्रद श्रीरामजी की है। तदनुरूप शरण में आये सभी को अभय प्रदान करनेवाले हैं और समस्त जगत् का सर्ग करने की शक्ति से युक्त हैं, एवं ब्रह्मादि देवों के भी ईश्वर (शासक) हैं। सर्वोत्पादक होने से स्वयं उत्पत्ति विनाश रहित हैं तथा सुरोत्तम ब्रह्मा हिरण्यगर्भ एवं इन्द्रादिक देव श्रेष्ठों से भी पूजित हैं तथा सूर्य चन्द्रमा तारागण विद्युत तथा अग्नि के भी प्रकाशक हैं, श्रुति का भी यही कहना है **'न तत्र सूर्यो भाति न चन्द्रतारकं नेमाविद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं**

तस्यभासा जगदिदं विभाति' तथा जो वीर शत्रुओं के अनेक प्रकार के शस्त्रास्त्र समूहों से अजेय हैं एवं उन शत्रुओं के ऊपर वारम्वार विजय प्राप्त करने वाले हैं। एवं **'सर्वेषामवताराणामवतारीरघूत्तमः'** इस आगम प्रमाणानुसार श्रीवराह एवं नृसिंह अवतार लेकर हिरण्याक्ष एवं हिरण्यकशिपु पर विजय प्राप्त किये तथा श्रीरामादि अवतारों में रावणादि का अन्त किये। तथा जो चेतन के जो बद्ध मुक्त नित्य भेद हैं, वे भिन्न भिन्न उन मुक्त जीवों के भी चेतनरूप हैं क्योंकि श्रुति कहती है **'नित्यो नित्यानां चेतनश्चेतनानाम्'** अर्थात् नित्य रूपतया प्रसिद्ध जो परमाणु, आकाश एवं जीवराशी हैं इनसे भी नित्य हैं। तथा जो एक है यानी सजातीय दूसरे से रहित हैं। क्योंकि श्रीरामजी में स्वकीय इच्छामात्र से सर्व वस्तुओं के साधक वाधक शक्ति होने से सहायकान्तर निरपेक्षत्व है। एवं जो जगत् भृत है जगत् का पोषण तथा रक्षण करनेवाले हैं। तथा जो ब्रह्म चतुर्मुख को सर्गादिकाल में उत्पन्न करके उन्हें वेद पढाने वाले हैं। **'यः सर्वज्ञः सः सर्ववित्'** श्रुति के वचनानुसार जो सर्वज्ञ एवं सर्वविद् हैं। एवं तपस्या आदि से श्रेष्ठत्व प्राप्त योगियों से भी दुर्लभ हैं। तथा सभी को वश में रखनेवाले हैं या सर्व प्रकाशशील कान्तिमान् हैं एवं जो स्वतन्त्र है एतादृश क्लेश कर्म विपाकाशयों से अपरामृष्ट पुरुष विशेष रूपसे सर्वेश्वर श्रीरामचन्द्रजी हैं वे भगवत्परायण सत्संगी आचार्यवान् मुमुक्षुजनों से ध्यान करने योग्य उपर्युक्त सर्वेश श्रीरामचन्द्रजी हैं, इतर नहीं यह अति संक्षेप से कहा गया है विशेष जिज्ञासुओं को मेरी प्रभा एवं किरण टीकाओं को देखना चाहिए।

कुत्र कार्यो निवासः ? इस दसवें प्रश्न में आचार्यश्री ने १५ श्लोकों द्वारा श्रीअयोध्या प्रभृति ४६ अति उत्तम तीर्थस्थानों का वर्णनकर उन तीर्थों के अधिष्टातृ देवों में सर्वेश श्रीरामचन्द्रजी की ही भावना करके उनकी आराधना के साथ श्रीरामचन्द्रजी की आराधना करते हुये निवास करने का आदेश दिये है। १५ वें श्लोक के आदि शब्द से पद्मपुराणादि में वर्णित निवास योग्य १०८ तीर्थों का संग्रह समझ लेना चाहिये।

कतिपय विद्वानों का मत है कि पुराणोक्त सभी तीर्थ यहाँ परिगणित थे, सम्भव है कि वे ही श्लोक रहे हों या तीर्थ नामके सूचक आचार्य कीर्ति श्लोक कालक्रम से लिपिकादिकों के दोष से स्खलित हो गये हों। यों भारतीय ऋषिशास्त्र परस्पर में एक दूसरे का पूरक होता है। पुराण रचयिता श्रीसम्प्रदाय (श्रीरामानन्द सम्प्रदाय)

के ही ७-वें आचार्य हैं तो भास्कर रचयिता २२ वें आचार्य, पूर्वाचार्योपदेश से ही कलिगत धर्म को लक्ष्यकर संक्षेप दृष्ट्या ४६ तीर्थों का ही जगदाचार्यश्री ने उपदेश किया हो। कुछ हो, भास्कर के १०।१५ वें श्लोक के आदि शब्द से पुराणोक्त तीर्थों का संग्रह करलेने से सव समञ्जस है।

अनन्तर ४ श्लोकों से इस दिव्य प्रबन्ध का महत्व कथन करते हुये इस प्रबन्ध के अधिकारी का निरूपण किया गया है तथा नियतेन्द्रिय होकर श्रीवैष्णवमताब्ज भास्कर के अनुष्ठाता सायुज्य मुक्ति के भागी होंगे ऐसा शुभाशीः प्रदान किये हैं-

॥ संक्षिप्त श्रीमन्त्रराज जपविधि ॥

शौचादि से निवृत्त होकर पूर्व अथवा उत्तर के तरफ मुहकर गरम पवित्र आसर पर वैठकर ॐ रामाय नमः ॐ रामभद्राय नमः ॐ रामचन्द्राय नमः इन मन्त्रों को वोलकर तीन वार आचमन कर ॐ रघुनन्दनाय नमः इस मन्त्र को वोलकर हाथ धोवे तब 'ॐ नमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः क्लीं तेजसे रां तारक ब्रह्म स्वाहा' इस मन्त्र से जल अभिमन्त्रित कर षडक्षर महामन्त्र को पढकर शिर पर उस जल को छिट के पुनः हाथ में जल लेकर नीचे लिखा विनियोग पढकर जल छोड़ दे-ॐ अस्य श्रीराम षडक्षर महामन्त्रस्य श्रीसीता ऋषिः गायत्री छन्दः श्रीरामो देवता रां बीजं नमः शक्तिः रामाय कीलकं श्रीसीताराम प्रीत्यर्थे जपे विनियोगः। तव न्यास करे-

ऋषिन्यास-ॐ श्रीसीता ऋषये नमः शिरसि। ॐ गायत्री छन्दसे नमः मुखे। ॐ श्रीरामो देवतायै नमः हृदि। ॐ रां बीजाय नमः पादयोः। ॐ रामाय कीलकाय नमः सर्वाङ्गे। **करन्यास**-ॐ रां अङ्गुष्ठाभ्यां नमः ॐ रीं तर्जनीभ्यां नमः। ॐ रूं मध्यमाभ्यां नमः। ॐ रैं अनामिकाभ्यां नमः। ॐ रौं कनिष्ठिकाभ्यां नमः। ॐ रः करतलकरपृष्ठाभ्यां नमः। **अङ्गन्यास**-ॐ रां हृदयाय नमः। ॐ रीं शिरसे स्वाहा। ॐ रूं शिखायै वषट्। ॐ रैं कवचाय हूम् ॐ रौं नेत्राभ्यां वौषट्। ॐ रः अस्त्राय फट्। **मन्त्राङ्गन्यास**-ॐ रां नमः मूर्ध्नि। ॐ रामाय नमः नाभौ ॐ नमो नमः पाद योः। ॐ रां बीजाय नमः दक्षिणस्तने। ॐ नमः शक्तये नमः वामस्तने। ॐ रामाय कीलकाय नमः हृदि। तव यथाशक्ति प्राणायाम कर इस श्लोक को बोलते हुये सर्वेश्वर श्रीरामजी का ध्यान करें-

नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

इसके वाद 'ॐ दाशरथाय विद्यहे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्' इस श्रीराम गायत्री मन्त्र का बारह वार जप करे अनन्तर श्रीमन्त्रराज-

卐 रां रामाय नमः 卐

का कम से कम तीन माला जपकर श्रीराम गायत्री का १२ वार जप करे । पुनः यथा शक्ति प्राणायाम कर **१-श्रीरामः शरणं मम** २-ॐ श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये' श्रीमते रामचन्द्राय नमः तथा ३-

ॐ सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

इन तीन मन्त्रों को यथा शक्ति जप करते हुये सर्वेश श्रीरामचन्द्रजी को साष्टाङ्ग दण्डवत् करे-

श्रीरामं जनकात्मजामनिलजंवेधोवशिष्ठावृषी
योगीशं च पराशरं श्रुतिविदंव्यासंजिताक्षंशुकम् ।
श्रीमन्तं पुरुषोत्तमं गुणनिधिं गङ्गाधराद्यान् यतीन्
श्रीमद्राघवदेशिकञ्चवरदं स्वाचार्यवर्यं श्रये ॥
सीतारामसमारम्भां रामानन्दार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

इन गुरु परम्परा मन्त्रों को बोलते हुये अपने आचार्य पर्यन्त समस्त पूर्वाचार्यों का स्मरणपूर्वक श्रीगुरुदेवजी को साष्टाङ्ग दण्डवत् प्रणाम करें ।

॥ श्रीरामानन्दाचार्यजी के मतानुसार पदार्थ-विभाग ॥



❋ सर्वेश्वरश्रीसीतारामाभ्यां नमः ❋

卐 अपरबादरायणश्रीपुरुषोत्तमाचार्यबोधायनाय नमः 卐

❋ जगद्गुरुश्रीराघवानन्दाचार्ययतीश्वराय नमः ❋

प्रस्थानत्रयानन्दभाष्यकार जगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीतः

श्रीवैष्णवमताब्जभास्करः

श्रीमन्तं श्रुतिवेद्यमद्भुतगुणग्रामाढ्यरत्नाकर
प्रेयःस्वेक्षणसंसुलज्जितमहीजाताक्षिकोणेक्षितम्। भक्ताशेष-
-मनोभिवाञ्छितचतुर्वर्गप्रदं स्वर्द्रुमं रामं स्मेरमुखाम्बुजं
शुचिमहानीलाश्मकान्तिं भजे॥१॥ ऐश्वर्यं यदपाङ्गसंश्रय-
-मिदं भोग्यं दिगीशैर्जगच्चित्रं चाखिलमद्भुतं शुभगुणा वा-
त्सल्यसीमा च या। विद्युत्पुञ्जसमानकान्तिरमितक्षान्तिः

सुपदमेक्षण दत्तान्नोऽरिबलसम्पदो जनकजा रामप्रिया सा-
-दिनिशम्॥२॥ प्रत्यूहव्यूहभङ्गं विदधदुरुबलश्शक्तिमान २
सर्वकारी भूरिश्रेयः प्रतापो मुनिवरनिकरैः स्तूयमानो विमान-
रक्षोदैत्यादिनाशी क्षुभितजलनिधिर्लोकजित्लोकमा-
-न्यो धन्यो नो मङ्गलौघं सपदि सुकरुतां द्रामशस्त्रास्त्रसङ्घः॥३॥

तत्वं किं किञ्च जप्यं परमिह विबुधैर्वैष्णवैर्ध्यानगम्यं?
मुक्तेः किं साधनं सत् सुमतिमतिमतो धर्म एकोऽस्तकञ्च?
धर्माणां वैष्णवास्ते गुरुवर! कतिधा? लक्षणं किञ्च तेषां?
कालक्षेपः किमाप्यं कथमुरुशुभदं कुत्र कार्य्यो निवासः?॥४॥

इत्थं पृष्टस्त्वया यः सकलहितकरः प्रश्ननाशिर्गरिष्ठो-
वेद्यः सर्वश्रुतीनां जगति सुरसुरानन्द सद्यो मया सः।

प्राचीनाचार्यवर्यान् यतिपतिसहितान् सादरं सम्प्रणम्य
सम्यक् शास्त्रानुसारं गुरुनिरत ! समाधीयते श्रूयतां तत् ॥५॥ ३
पृष्टानामेकमाद्यं त्रिकमपि शृणु तद्भेदतो नामभेदै-
र्नित्याऽज्ञाऽचेतना सा प्रकृतिरविकृतिर्विश्वयोनिश्शुभैका।
नानावर्णात्मिकाऽजा त्रिगुणसुनिलयाऽव्यक्तशब्दाभिधेया
निर्व्यापारा परार्था महदहमितिसूरुच्यते तत्त्वविद्भिः ॥६॥

नित्यो ज्ञश्चेतनोऽजः सततपरवशः सूक्ष्मतोऽत्यन्तसूक्ष्मो
भिन्नो बद्धादिभेदैः प्रतिकुणपमसौ नेकधा सूरिवर्य्यैः।
श्रीशाकान्तालयस्थो निजकृतिफलभुक् तत्सहायोऽभिमानी
जीवः सम्प्रोच्यते श्रीरघुपतिसुमते ! तत्त्वजिज्ञासुवेद्यः ॥७॥

सुपदमेक्षण दत्तान्नोऽरिबलसम्पदो जनकजा रामप्रिया सा-
-दिनिशम्॥२॥ प्रत्यूहव्यूहभङ्गः विदधदुरुबलश्शक्तिमान २
सर्वकारी भूरिश्रेयः प्रतापो मुनिनरनिकरैः स्तूयमानो विमान-
रक्षोदैत्यादिनाशी क्षुभितजलनिधिर्लोकजित्लोकमा-
-न्यो धन्यो नो मङ्गलौघं सपदि सुकरुतां द्रामशस्त्रास्त्रसङ्घः॥३॥

तत्वं किं किञ्च जप्यं परमिह विबुधैर्वैष्णवैर्ध्यानगेमष्टं?
मुक्तेः किं साधनं सत् सुमतिमतिमतो धर्म एकोऽस्तकश्च?
धर्माणां वैष्णवास्ते गुरुवर! कतिधा? लक्षणं किञ्चतेषां?
कालक्षेपः किमाप्यं कथमुरुशुभदं कुत्र कार्य्यो निवासः?॥४॥

इत्थं पृष्टस्त्वया यः सकलहितकरः प्रश्नराशिर्गरिष्ठो-
वेद्यः सर्वश्रुतीनां जगति सुरसुरानन्द सद्यो मया सः।

प्राचीनाचार्यवर्यान् यतिपतिसहितान् सादरं सम्प्रणम्य
सम्यक् शास्त्रानुसारं गुरुनिरत ! समाधीयते श्रूयतां तत्" ५ " ३
पृष्टानामेकमाद्यं त्रिकमपि शृणु तद्भेदतो नामभेदै-
र्नित्याऽज्ञाऽचेतना सा प्रकृतिरविकृतिर्विश्वयोनिश्च मूलम्।
नानावर्णात्मिकाऽजा त्रिगुणसुनिलयाऽव्यक्तशब्दाभिधेया
निर्व्यापारा परार्ध्या महदहमितिसूरुच्यते तत्त्वविद्भिः " ६ "

नित्यो ज्ञश्चेतनोऽजः सततपरवशः सूक्ष्मतोऽत्यन्तसूक्ष्मो
भिन्नो बद्धादिभेदैः प्रतिकुणपमसौ नेकधा सूरिवर्य्यैः।
श्रीशकान्तालयस्थो निजकृतिफलभुक् तत्सहायोऽभिमानी
जीवः सम्प्रोच्यते श्रीरघुपतिसुमते ! तत्त्वजिज्ञासुवेद्यः " ७ "

विश्वं जातं यतोऽद्धा यदवितमखिलं लीयते यत्र चान्ते ४
सूर्यो यत्तेजसेन्दुः सकलमविरतं भासयत्येतदेषः।
यद्भीत्या वाति वातोऽवनिरपि सुतलं याति नैवेश्वरोऽज्ञः
साक्षी कूटस्थ एको बहुशुभगुणवान्नव्ययो विश्वभर्ता॥८॥
श्रीमानर्च्यः शरण्यो बहुविधविबुधैर्योगिगम्याङ्घ्रिपद्मो-
स्पृश्यः क्लेशादिभिः सत्समुदितसुयशाः सूरिमान्यो वदान्यः।
राजवच्छ्रीरामचन्द्रः सुमहितमहिमा साधुवेदैरशेषै-
र्निर्मत्युः सर्वशक्तिर्विकलुषविजरो गीर्मनोऽभ्यामगम्यः॥९॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
तत्वनिरूपणात्मकः प्रथमप्रश्नोत्तराख्यः
प्रथमः परिच्छेदः ॥१॥

सञ्जप्यस्तारकाद्यो मनुवर इह तैर्वह्निबीजं यदादौ रामे
ङेप्रत्ययान्तो रसमित शुभदस्वक्षरः स्यान्नमोऽन्तः। मन्त्रो
रामद्वयाद्यः सकृदितिचरमप्रान्वितो गुह्यगुह्योद्भूताक्ष्यु-
-त्संख्यवर्णः सुकृतिभिरनिशं मोक्षकामैर्निषेव्यः॥१॥

मन्त्राणां व्यापकानां भगवत इह चाव्यापकानान्तु मध्ये ऽ-
तिस्नेष्णो व्यापकः स श्रुतिमुनिसुमतः शिष्टमुख्यैर्गृहीतः।
नित्यानामाश्रयोऽयं परित उरुशुभो राममन्त्रः प्रधान-
प्राप्योऽथ प्रापकश्च प्रचुरतरगुणज्ञानशक्त्यादिकानाम्॥२॥

यावद्वेदार्थगर्भं प्रणविजगदुदाधारभूतं सविन्दु प्रत्यक्तं
रामबीजं श्रुतिमुनिगदितोत्कृष्टषड्व्याप्तिभेदम्।
रेफारूढत्रिमूर्ति प्रचुरतरमहाशक्ति विश्वोन्निदानं
शश्वत्संराजते यद्विविधसकलसंभासमानप्रपञ्चम्॥३॥

तत्राद्येन पदेन रेण भगवान् सीतापतिः प्रोच्यते
श्रीरामो जगतां गुणैकनिलयो हेतुश्च संरक्षकः।
तच्छेषी पदतोऽप्यतो भगवतोऽनन्यार्हशेषत्वकं
व्यावृत्तिस्तु सुरान्तरादिगतसत्तच्छेषताया मुहुः॥४॥
पितापुत्रत्वसम्बन्धो जगत्कारणवाचिना।
रक्ष्यरक्षकभावश्च रेण रक्षकवाचिना॥५॥
शेषशेषित्वसम्बन्धश्चतुर्थ्या लुप्तयोच्यते।
भार्याभर्तृत्वसम्बन्धोऽप्यनन्यार्हत्ववाचिना॥६॥
प्रकारेणापि विज्ञेयो मध्यस्थेन महामते!।
स्वस्वामिभावसम्बन्धो मकारेणाथ कथ्यते॥७॥
आधाराधेयभावोऽपि ज्ञेयो रामपदेनतु। सेव्यसेवकभावस्तु चतुर्थ्या
विनिगद्यते॥८॥ नमःपदेनाखण्डेन त्वात्मातीयत्वमुच्यते।
षष्ठ्यन्तेन मकारेण भोग्यभोक्तृत्वमप्युत॥९॥ ज्ञानानन्दस्व-
रूपोऽवगतिसुखगुणो मेन वेद्योऽणुमानो देहादेरप्यपूर्वो
विविदितर्विधस्तत्प्रियस्तत्सहायः। नित्यो जीवस्तृतीयेन

तु खलु पदतः प्रोच्यते स्वप्रकाशो जिज्ञासूनां सदेत्थं शुभमति-
-सुमते! शास्त्रवित्सज्जनानाम् ॥१०॥ मवाच्योऽहं रवाच्याय ८
शेषभूतोऽस्मि सर्वदा। इतीत्थमेव बोध्यो ज्ञैर्वाक्यार्थस्तद्विवित्सया
॥११॥ रामायेति चतुर्थेन श्रिया देव्यास्तु सर्वदा। चेतनाऽचेतनाच्च
रमणाश्रयतेर्यते ॥१२॥ स सर्वविधबन्धुत्वं सर्वप्राप्यत्वमेव च।
सर्वप्रापकता तेन तथा चोच्चयलिङ्गता ॥१३॥ उच्यते तत्पदेनैव
सच्चिदानन्दरूपता। यावद्भूतिनेतृत्वं श्रीरामब्रह्मणो मतम् ॥१४॥
रागादिकारणे बन्धौ तेनैवाविनिवर्त्यते। बन्धुत्वप्रतिपत्तिश्च
भासमानाविचारतः ॥१५॥ तच्चतुर्थ्या सानुरूपकैङ्कर्यप्रार्थनोच्यते।
विषयान्तरसेवाऽपि प्राप्ता सा विनिवर्त्यते ॥१६॥ पदेन नेनान्त्र
तु पञ्चमेन प्रकथ्यतेऽथो तदनन्यशेषता। हेयं तदन्यार्थमपि
स्वतन्त्रता निवर्त्यतेऽतः सततं स्वकीया ॥१७॥ पदेन षष्ठेन
मदित्यनेन स्वस्वाम्यनन्यार्हकशेषताऽपि। समुच्यते चेतन-
-वाचिना तु तत्किङ्करत्वैकफलत्वमेव ॥१८॥ उपायार्थपरेण-
-सावखण्डनमसोच्यते। उपायो हि मवाच्यस्य रवाच्यो रामएव सः ॥१

चरणावित्यनेनैव वात्सल्यादिकसीतयोः। विलक्षणस्य दिव्यस्य विग्रहस्याश्रयस्य च ॥२९॥ शरणेतिपदेनैवोपाय-स्तद्विग्रहो बुधैः। उपायाध्यवसायस्तु प्रपद्य इति वर्ण्यते ॥३०॥ प्राप्यं मिथुनमेवेति श्रीमते पदतो मतम्। रामचन्द्रेति पदतः स्वामित्वं प्रतिपाद्यते ॥३१॥ विभक्त्यायेतिपदतः शेषवृत्तिर्म-हात्मभिः। विरोधिनो निरासस्तु नमः पदेन वर्ण्यते ॥३२॥ तात्पर्यार्थोऽस्य विज्ञेय आचार्यरुचिसंश्रयः। वाक्यार्थो मन्त्र-रत्नस्य त्वथ निर्णीयते बुधैः ॥३३॥ प्राप्यप्रापकसम्बन्ध-स्वरूपाभिनिरूपणम्। प्रधानार्थस्तु तद्युग्मकैंकर्यस्य प्रधानता ॥३४॥ स्वदोषाभ्यनुसन्धानमनुसन्ध्यर्थ उच्यते। एवमेवानुसन्धेयं मोक्षकामैरहर्दिवम् ॥३५॥

प्रोक्ता वत्सक! मन्त्ररत्नविवृतिः सन्मानसाभीष्टद सद्वेद्यं सकृदित्यवेहि चरमं निर्णीतवाक्यार्थकम्। रामीयं हि तदीयमन्त्रनिरतैरुद्बोधनीयं परं द्वात्रिंवशत्प्रमिताक्षरं

मनुपदं द्व्यर्द्धं जगद्विश्रुतम् ॥३६॥ अत्रोपायाऽन्तरस्याथो निवृत्तिः
प्रतिपाद्यते। सकृदित्येवकारेण तूपायनिरपेक्षता ॥३७॥ १०
प्रपन्नायेतिपदतस्तूपायस्थानमुच्यते। उपायत्वं भगवतस्त-
-वेति पदतस्तथा ॥३८॥ अस्मीत्यनेन चोपायस्वीकारः प्रतिपा-
-द्यते। समाप्त्यर्थेति शब्देन तूपायानन्यतोच्यते ॥३९॥ चका-
-रतोऽनुक्तसमुच्चयार्थतो निगद्यते त्वन्य उपाय आत्मवित्।
उपायसंसेव्यधिकारिलक्षणं पदेन वै याचत इत्यनेन तु ॥४०॥
अथाभयमितिप्राप्तिप्रतिबन्धकवारणम्। सर्वभूतेभ्य इत्येव
प्राप्यस्य प्रतिबन्धकम् ॥४१॥ ददामीतिपदेनाथोपायस्य सर्व-
शक्तिता। एतदित्येवपदतोऽसंशयत्वमितीर्य्यते ॥४२॥ तात्पर्या-
-र्थोऽस्य विज्ञेयः शरण्यरुचिसंश्रयः। तत्प्रापकस्वरूपस्य
वाक्यार्थोऽथ निरूपणमम् ॥४४॥ प्रधानार्थः परेशस्य स्वरूपस्य
निरूपणम्। निर्भरत्वानुसन्धानमनुसन्ध्यर्थ उच्यते ॥४५॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराज्रणीते श्रीवैष्णवमताबजभास्करे
जप्यात्मकनिरूपणात्मको द्वितीयप्रश्नोत्तराख्यो
द्वितीय परिच्छेदः ॥२॥

प्रश्नोच्यते महाप्रज्ञ ! ध्यानं ध्येयस्य चिन्तनम् बुधैरात्म-
परैर्नित्यं जितप्राणैर्जितेन्द्रियैः ॥१॥ विकचपद्मदलायतवीक्षणं ११
विधिभवादिमनोहरसुस्मितम् जनकजादृगपाङ्गसमीक्षितं
प्रणतसत्समनुग्रहकारिणम् ॥२॥ मुनिमनः सुमध्रुवतचुम्बि-
-तस्फुटलसन्मकरन्दपदाम्बुजम् बलवदद्भुतदिव्यधनुः
-शरामहितजानुबिलम्बिमहाभुजम् ॥३॥ परार्घ्यहाराङ्गद-
-चारुनूपुरं सुपद्मकिञ्जल्कपिशङ्गवाससम् नवसद्घन-
-श्यामतनुं गुणाकरं कृपार्णवं सदुदयाम्बुजासनम् ॥४॥
प्रसन्नलावण्यसुभग्नमुखाम्बुजं जगच्छरण्यं शरणं नरो-
-त्तमम् दयापरं दाशरथिं महोत्सवं स्मरामि रामं सह सीतया
सदा ॥५॥ द्विभुजस्यैव रामस्य सर्वशक्तेः प्रियोत्तम ध्यान-
-मेवं विधातव्यं सदा रामपरायणैः ॥६॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराज्ञणीते श्रीवैष्णवमताबजभास्करे
ध्याननिरूपणात्मस्तृतीयप्रश्नोत्तराख्यः
तृतीयः परिच्छेदः ॥३॥

एवं तेऽभिहितं ध्यानं शृणु तन्मुक्तिसाधनम्। मुमुक्षूणां परं वेद्यं विधेयं चाथ सर्वदा ॥१॥ तप्तेन मूले भुजयोः समङ्कनं शरेण चापेन तथोर्ध्वपुण्ड्रकम्। श्रुतिस्मृतं नाम च मन्त्र-मालिके संस्कारभेदाः परमार्थहेतवः॥२॥ यतेन्द्रियः शुचिः शुद्धवेशधृक् सुकुलोद्भवः। सदाचारपरो नम्रः शास्त्रज्ञो देशन-पटुः॥३॥ विरक्तधर्मनिरतो ध्यानाभ्यासी सुबुद्धिमान्। निग्रहेऽनुग्रहे चैव समर्थो देशिको मतः॥४॥ हीनाङ्गोऽधिकाङ्गश्च कपटी कृष्णदन्तवान्। नेत्ररोगी च कुष्टी च वाचाल-कश्च वामनः॥५॥ व्यसनी बहुनिद्रश्च कुनखो बहुभोजनः। नेदृशो देशिको योग्यो मुमुक्षोर्मुक्तिसाधने॥६॥ श्रद्धान्वितो विशुद्धात्मा मेधावी विनयी पटुः। कुलीनः सच्चरित्रश्च बुद्धिमान् व्रततत्परः॥७॥ गुरुशुश्रूषणे शक्तः आज्ञाकारी जितेन्द्रियः। प्रणतित्वरणे भक्तिनिष्ठः शिष्यः कार्यस्तु दैशिकैः॥८॥ परीक्ष्य शिष्यं समुपासकं गुरुर्वर्षं समन्त्र्यर्च्य

च वह्निदेवताम्। चापादिभिर्हेतिवरैः सुतापितैः दिनेसुपुण्ये
नियतः समङ्क्येत ॥९॥ सहोर्ध्वपुण्ड्रं सुमृदा श्रिया तथा रामा-
-दिदास्यान्वितनाम कुर्यात्। मन्त्रं तथैवोपदिशेद्विधानतो १३
मालां च दध्यात् तुलसीसमुद्भवाम् ॥१०॥ एवं महान् भागवत
सुसंस्कृतो रामस्य भक्तिं परमां प्रकुर्यात्। महेन्द्रनीलाश्मरुचेः
कृपानिधेः श्रीजानकीवल्लभरावणारेः ॥११॥ उपाधिनिर्मुक्त-
मनेकभेदका भक्तिः समुक्ता परमात्मसेवनम्। अनन्यभावेन
मुहुर्मुहुः सदा महर्षिभिस्तैः खलु तत्परत्वतः ॥१२॥ सा तैलधारा-
समनित्यसंस्मृतेः सन्तानरूपेत्रि परानुरक्तिः। भक्तिर्विवेका-
-दिकसप्तजन्या तथा यमाद्यष्टसुबोधकाङ्गा ॥१३॥ उदारकीर्तेः
श्रवणं च कीर्तनं हरेर्मुदा संस्मरणं पदाश्रितिः। समर्चनं वन्दन-
-दास्यसख्यान्यात्मार्पणं सा नवधेति गीयते ॥१४॥

एकादशीत्यादिमहाव्रतानि वै कुर्याद्विधेयानि हरिप्रियाण्यथ।
विद्धा दशम्या यदि साऽरुणोदये सद्भादशीं तूपवसेद्विहायताम् ॥१५॥

शुद्धा दशम्या सुयुतेति भेदभागेकादशी सा द्विविधा प्रबुध्यताम्।
वेधोऽपि बोध्यो द्विविधोऽरुणोदये सूर्योदये वा दशमी प्रवेशतः॥१३॥
स पञ्च पञ्च प्रमितो ह्यपो बुधैः कालस्तु षट्पञ्चमितोऽरुणोदयः। १४
प्रातस्तु सप्तेषुमितो निगद्यते सूर्योदयः स्यात्तु ततः परं तथा॥१७॥
घटी चतुष्कं ह्यरुणोदयाभिधः प्रातर्विमृष्टः समयो महर्षिभिः।
तथाऽत्र वेधप्रकृतेर्विपश्चितः प्राहुर्विभागान् चतुरो विवेकिनः॥१८॥
घटीत्रयं सार्द्धमथारुणोदये वेधोऽतिवेधः कथितो घटीद्वयम्।
रविप्रभासस्य तथोदितेऽर्द्धके सूर्ये महावेध इतीर्यते बुधैः॥१९॥
योगस्तुरीयस्तु दिवाकरोदये तेऽर्वाक् सुदो घातिशमार्थबोधकाः।
सर्वेऽपि वेधा मुनिभिर्विनिश्चिता निर्णेतृभिस्तस्य तु तत्त्वदर्शिभिः॥२०॥
पूर्णेति सूर्योदयकालतः सा या प्राङ्मुहूर्तद्वयसंयुता च। अन्या
तु विद्धा परिकीर्तिता बुधैरेकादशी सा त्रिविधापि शुद्धा॥२१॥
एका तु द्वादशीमात्राधिका ज्ञेयोभयात्मिका। द्वितीया च तृतीया
तु तथैवानुभयात्मिका॥२२॥ तत्राद्या तु परैवास्ति ग्राह्या विष्णु-
परायणैः। शुद्धाप्येकादशी हेया परतो द्वादशी यदि॥२३॥उपोष्य
द्वादशीं शुद्धां तस्यामेव च पारणम्। उभयोरधिकत्वे तु परोपोषणा

विचक्षणैः॥२४॥ उन्मीलिनी वञ्जुलिनी सुपुण्याः सा त्रिस्पृशा-
-ऽथो खलु पक्षवर्धनी। जया तथाष्टौ विजया जयन्ती द्वादश्य
स्ता इति पापनाशनी॥२५॥ आषाढभाद्रोर्जासितेषु संगता मैत्र-
-श्रवोऽन्त्यादिगतद्व्युपान्त्यकैः। चेद् द्वादशी तत्र न पारणं बुधः
पादैः प्रकुर्याद् व्रतवृन्दहारिणी॥२६॥

मासे मथौ या नवमी सुयुक्ता शुक्लाऽदितीशेन शुभेन भेन।
कर्के महापुण्यतमा सुलग्ने जातोऽत्र रामः स्वयमेव विष्णुः॥२७॥
तामष्टमीवैद्धयुतां विहाय व्रतोत्सवं तत्र करोतु भक्तः।
प्रसङ्ख्यसूर्यग्रहतोऽधिका वै या केवला सानवमीप्युपोष्या॥२८॥
प्रत्र प्रकुर्वीत मुदा व्रतोत्सवं रामार्चनं जागरणं महाफलम्।
प्रनेकजन्मार्जितपापनाशनं श्रीरामकीर्तेः श्रवणं च कीर्तनम्॥२९॥
पुष्यान्वितायां तु कुजे नवम्यां श्रीमाधवे मासि सिते दलन।
कृष्टा क्षितिः श्रीजनकेन तस्याः सीताऽऽविरासीद् व्रतमत्र कुर्यात्॥३०॥

स्वात्यां कुजे शैवतिथौ तु कार्तिके कृष्णेऽञ्जनागर्भत एव १६
मेषके। श्रीमान् कपीट् प्रादुरभूत् परन्तपो व्रतादिना तत्र तदुत्सवं चरेत् ॥३१॥

वैशाखमासीयचतुर्दशी सिता निशामुखे याऽनिलभेन संयुता।
सोमेऽवतारो नृहरेरभूदथो व्रतोत्सवं तत्र मुदा समाचरेत ॥३२॥
स्मरेण विद्धा तु चतुर्दशी यदा भवेद्धनापत्यविनाशिनी तदा।
तत्रोपवासो न जनैर्विधीयतां महात्मभिर्विष्णुपरायणैरपि ॥३३॥

भाद्रेऽसिते निशीथेऽथ रोहिण्यामष्टमीतिथौ। सिंहमर्के गते सौम्ये
कृष्णो जातो विधूदये ॥३४॥ कृष्णजन्माष्टमी सोक्ता तस्यां
कृष्णव्रतोत्स्वम्। कुर्वीत विधिसंयुक्तं चतुर्वर्गफलप्रदम् ॥३५॥
त्याज्याष्टमी चेदथ वाजिविद्धा तथाग्निविद्धं विधिभं च हेयम्।
चेदष्टमी नो विधिभेन युक्ता महात्मभिर्विष्णुपरायणैस्तैः ॥३६॥

विद्धा जयन्ती यदि सप्तमीयुता शुद्धा तथा सा नवमीयुता यदि।
विद्धाऽथ वेद्याऽग्न्ययुता हि रोहिणी ज्ञेया तु शुद्धा यदि सा परान्विता ॥३७॥ ९७

भाद्रेऽथ शुक्लेऽभिजिति प्रभुर्हरिर्या द्वादशी वैष्णवभेल संयुता।
तत्रादितावाविरभूच्च वामनो व्रतोत्सवं तत्र मुदा समाचरेत् ॥३८॥
स्पृशत्यैकादशीं स्पृष्टा द्वादशी श्रवणेन चेत्। विष्णुपृङ्खलयोगो-
-ऽयं भाद्रे शुक्ले प्रकीर्तितः ॥३९॥ श्रवणा द्वादशी ह्येषा पुनरावृत्ति-
-नाशिनी। तस्मादुपवसेदत्र यत्नतो मतिमान्नरः ॥४०॥ तथा
यथाकालमतन्द्रितैस्तैरथाधिरोपादिकमुत्सवादिकम्।
सदा विधेयं हरितोषणं परं शुभप्रदं तद् बहुशास्त्रसम्मतम् ॥४१॥
कर्मप्रवाहेण तु चेतनस्य संसरतस्य संसारमहार्णवे चिरम्।
उपर्य्यहो संसरतोऽवशस्य सत्कृपोडुवत्येव हरेरहैतुकी ॥४२॥
मोक्षे मुमुक्षोर्नहि तारतम्यं फले प्रपन्नस्य तु सत्प्रपत्तेः।

अस्त्येव तद्धाम कृपोपलभ्ये पतिं श्रियोऽनन्तगुणार्णवं तम् ॥४३॥
भवन्त्युपायान्तरमेव सर्वे स्वातन्त्र्यतो मुक्तिपदप्रदास्ते।
सुकर्मसंवेदनभक्तियोग प्रपत्तिनिष्ठैः समनुष्ठितास्तु ॥४४॥
विभुत्वतो निर्भरता परैस्तैः श्रीव्याप्तिरार्यैरभिधीयते हि।
प्रपञ्चनिर्मातृविरिञ्चहेतुश्रीरामपादाब्जनिविष्टचित्तैः ॥४५॥
नित्यं सा पुरुषकारभूता सीताऽनपायिनी। अनुपायान्तरै-
र्विज्ञैरुच्यते तदुपायता ॥४६॥ विभोश्च वात्सल्यमहार्णवस्य
वै वात्सल्यमिष्टं जनदोषभोगिता। समुच्यते तैर्नृभर-
स्वतन्त्रकैः सदा सदाचार परायणैर्वरैः ॥४७॥ दयान्यदुःख-
स्य निगद्यते बुधैरनाकृतैस्तैरसहिष्णुता स्मृता। कृपा-
महाब्धेः समुदारकीर्तेर्विष्णोरचिन्त्याखिलवैभवस्य वै ॥४८॥
स्वीयप्रवृत्तेस्तु निवृत्तिरिष्टो न्यासोऽथ वेद्योऽपि बुधैः सदैव।
ऐकान्तिकैस्तत्त्वविचारदक्षैः परात्मनिष्ठैः परमास्तिकैस्तैः ॥४९॥
सर्वे प्रपत्तेरधिकारिणः सदा शक्ता अशक्ता पदयोर्जगत्प्रभोः।

अपेक्ष्यते तत्र कुलं बलं च नो न चापि कालो न च शुद्धतापि
वै ॥५०॥ धर्मत्यागोऽपि परमैकान्तिकैरुच्यते वरैः। इत्थं हि ९५
कर्मणां त्यागः स्वरूपस्यास्खलस्य च ॥५१॥ अथोपायान्त-
राण्येव प्रवदन्ति मनीषिणः। विरोधीति प्रपत्तेस्तु सम्बन्ध-
ज्ञानकोविदाः ॥५२॥ लोकसंग्रहणार्थन्तु श्रुतिचोदितकर्म-
णाम्। शेषभूतैरनुष्ठानं तत्कैङ्कर्यपरायणैः ॥५३॥ रामप्रसाद-
हेतुर्हि न्यासोऽयं विनिगद्यते। नित्यशत्रैः सदाचारैर्हरि-
पादाब्जमानसैः ॥५४॥ कृतप्रपत्तिस्मरणं प्रायश्चित्तमथो-
च्यते। परमाप्तैश्च तन्निष्ठैः कोविदैस्तैर्मुमुक्षुभिः ॥५५॥
उत्कृष्टवर्णैरपि वैष्णवैर्जनैर्निकृष्टवर्णैः स तदीयसेवने।
तथानुसर्त्तव्य इतीष्यते बुधैः शास्त्रैर्विधेये विधिगोचरैः
परैः ॥५६॥ अणुव्याप्तौ च भगवानणुष्वणुरुच्यते।
पराकाष्ठापरैर्विज्ञैर्मतविद्भिर्महात्मभिः ॥५७॥ आत्मारामै-
स्तथोपायस्वरूपज्ञानिभिश्च तैः। मतज्ञैर्विरजापारं

कैवल्यमिति मन्यते ॥५८॥ जितेन्द्रयश्चात्मरतो बुधो-
ऽसत् सुनिश्चितं नाम हरेरनुत्तमम्। अपारसंसारनिवार-
णक्षमं समुच्चरेद् वैदिकमाचरन् सदा ॥५९॥ २०

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
मुक्तिसाधननिरूपणात्मकश्चतुर्थप्रश्नोत्तराख्यः
चतुर्थः परिच्छेदः ॥४॥

एवं तेऽभिहितं वत्स! प्रकृष्टं मुक्ति साधनम्। उत्तमं सर्वधर्माणां शृणु
धर्मं सनातनम् ॥१॥ दानं तपस्तीर्थनिषेवणं जपो न चास्त्यहिंसा
सदृशं सुपुण्यकम्। हिंसामतस्तां परिवर्जयेज्जनः सुधर्मनिष्ठो दृढ-
धर्मबुद्धये ॥२॥ श्रयन्ति धर्मास्तु तया पृथक् स्थितान् सुवक्रगाः
सिन्धुमिनापि निम्नगाः। काष्ठस्थवह्निरिव घातको हरेश्चराचरस्थस्य
च जन्तुहिंसकः ॥३॥ जलस्थजन्तूत्पन्नशरीरिहिंसया विवर्जयेन्मांस-
मुदारधीः सदा। दयापरोऽधोगतिहेतुरूपयाऽऽचराय लभ्यं भवती-

-निवृत्तये॥४॥ न स्त्रियं परिगृह्णीयाद्विरक्तो वैष्णवः क्वचित्।
मन्वादिस्मृतिशास्त्रेषु तन्निषेधस्य शासनात्॥५॥ विवाहे तु कृते २१
स स्यादारूढपतितो ध्रुवम्। आरूढपतितस्यार्थे प्रायश्चित्तं न विद्यते
॥६॥ प्रच्युतो नैष्ठिकाद्धर्मादात्महापि प्रकीर्तितः। मठाध्यक्षत्व-
-दीक्षादौ बहिष्कार्यः स यत्नतः॥७॥ व्यासेन ब्रह्मविद्यातो बहिष्कारो-
-ऽस्य सूचितः। श्रिष्टा यज्ञादिकार्य्येषु वर्जयन्ति तथाविधम्॥८॥
विरक्तैः वैष्णवैस्तस्मादारूढपतितो न हि। व्यवहारेषु योक्तव्यः तत्सं-
-सर्गोऽपि पापकृत्॥९॥ समर्प्य कर्मणि शुभानि वैष्णवो रामाद्य
भक्ष्यं च निवेद्य भक्षयेत्। प्रहर्दिवं वीतभयं समुत्तमं विमुक्तधीः
स्वाघनिवृत्तिकामनः॥१०॥

आचोवतारोऽपि च देशकालप्रकर्षहीनः श्रितसम्मतश्च। सहिष्णुरप्राकृत-
-देहयुक्तः पूर्णोऽर्चकाधीनसमात्मकृत्यः॥११॥ स्वयं व्यक्तश्च सैद्धो
मानुष स्वच। देशादौ हि प्रशस्ते स वर्तमानश्चतुर्विधः॥१२॥
प्रावाहनासनाभ्यां च पादाद्याऽऽचमनस्तथा। स्नानवस्त्रोपवीतैश्च

गन्धपुष्पसुधूपकैः॥१३॥ दीपनैवेद्यताम्बुलप्रदक्षणविसर्जनैः।
षोडशार्चाप्रकारैस्तमेतैरर्चेत्सदा सुधीः॥१४॥ जगत्पते! श्रीश! २२
जगन्निवास! प्रभो! जगत्कारण! रामचन्द्र! नमो नमः कार-
-णिकाय तुभ्यं पादाब्जयुग्मे तव भक्तिरस्तु॥१५॥ मनोमिलिन्द-
-स्तव पादपङ्कजे रमार्चिते संरमतां भवे भवे। यशः श्रुतौ ते ममकर्ण-
-युग्मकं त्वद्भक्तसङ्गोऽस्तु सदा मम प्रभो॥१६॥ उरःशिरोदृष्टि-
-मनोवचःपदद्वयप्राजत्करयुग्मजानुभिः। अङ्गैरिक्षतौ तं प्रणमेद-
-ष्टाभिर्दीर्घं तथैतैः कृतधीश्च दण्डवत्॥१७॥ बाहू च पादौ च
प्रसार्य साञ्जलिः स्तवैः स्तुवन् यश्च नमेद् रघूत्तमम्। शतैः
क्रतूनां तु सुदुर्लभां गतिं स चाप्नुयाद् रामपरायणो जनः॥१८॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे
मुख्यधर्मात्मकश्रीवैष्णवधर्मनिरूपणात्मकःपञ्चमप्रश्नोत्तराख्यः
पञ्चमः परिच्छेदः ॥५॥

अथोच्यते वैष्णवभेद दीप्सतो ज्ञातुं च ते विष्णुपरायणैर्जनैः॥

सुवेदनीयो बहुधा महामते सुनिश्चितो विज्ञवरैर्महर्षिभिः॥१॥
प्राप्तुं परं सिद्धिमकिञ्चनो जनो द्विजातिरिच्छञ्शरणं हरिं व्रजेत्। परं दयालुं स्वगुणनपेक्षितक्रियाकलापादिकजातिबन्धनम्॥२॥
जीवो द्विधाऽमन्यत बद्धमुक्तभेदेन पूर्वैस्तु महर्षिवर्यैः। बद्धोऽपि तत्र द्विविधो मुमुक्षुबुभुक्षुभेदाद् गदितो मतज्ञैः॥३॥ अनादिकर्मैकरजातनानादेहाभिमानी सुमतोऽथ बद्धः। स चाऽच्युताऽहैतुककृपाबलेनाविद्याक्रियावासरुचिप्रवृत्तेः॥४॥ विमोक्तुमिच्छुस्तु मुमुक्षुरुक्तः सम्बन्धतः प्राज्ञसुसंमतोऽयम्। तथैव सांसारिकभोगमिच्छुर्बुभुक्षुरन्यः कथितो बुधेन्द्रैः॥५॥ मुमुक्षवोऽपि द्विविधा महर्षिभिः प्रोक्ता अकामाः स्मृतिभक्तिशालिनः।
वेदोक्तवर्णाश्रमकर्मकारिणस्तदुपासकादिप्रतिभेदभेदिताः॥६॥
स्वकर्मविज्ञानसभक्तिसाधनं तयोररीकृत्य सुविज्ञ! कञ्चन।
सम्प्राप्य सम्बन्धविशेषमुत्तमं सदा भवन्त्येव च मोक्षनिश्चयाः॥७॥
विहाय चान्यत्परमं दयानिधिं प्राप्यं समर्थं निरपायमीश्वरम्।

२३

उपायमेतेऽध्यवसीय सुस्थिता ज्ञेयाः प्रपन्नाः सततं हरिप्रियाः॥८॥
पुरुषकारैकनिष्ठास्तु हरेस्वातन्त्र्यमीक्ष्य च। कृपाप्रचुरमाचार्यं २४
मत्वोपायमवस्थिताः॥९॥ द्विविधास्ते निजाचार्यकृपामात्रप्रप-
न्नकाः। तथा सेवातिरेकप्रपन्नाश्चेति सदा सताम्॥१०॥ प्रपन्ना-
श्चापि दृप्तः स्य तथा चार्त इति द्विधा। शरीरस्थितिपर्य्यन्तमाद्यो-
ऽत्रैव यथोचितम्॥११॥ प्राप्तदुःखादिभुञ्जानः शरीरान्तेऽवसीय
च। महाबोधोऽति विश्वासो मोक्षसिद्धिमवस्थितः॥१२॥ अथा-
न्त्योऽसहमानस्तत्क्षणमेव तु संसृतिम्। तथैव भगवत्प्राप्तौ
सत्वरस्वान्त उच्यते॥१३॥ श्रवणादिमात्रनिष्ठाः शुद्धभक्ताः
प्रकीर्तिताः। अन्तर्भाव्यास्तत्र तत्र तथानुक्ता मुमुक्षवः॥१४॥
नित्यकादाचित्कभेदान्मुक्तद्वैविध्य मुच्यते। नित्याः कदाचि-
त्तत्रापि सिद्धाः सुपुरुषावराः॥१५॥ गर्भजन्मादिदुःखं नेऽनव-
भूय स्थिताः सदा। सीतारामप्रियाः शश्वदाञ्जनेयादयो मताः॥१६॥
नित्यमुक्ता अपि द्वैध्या परिजनाः परिच्छदाः। मारुत्याद्याः किरी-
टाद्याः क्रमात् ते च प्रकीर्त्तिताः॥१७॥ भागवताः केवलाश्च कदाचित्का

ऽप्यपि द्विधा। तत्र भागवता बोध्या येषु भगवत्परा:॥१८॥ भगवद्भोग्य-
भूत्यादिसाक्षात्कारसुखाश्रया:। श्रीरामभानसा नित्यं तदनुध्या- २५
-नतत्परा:॥१९॥ केचिद्गुणानुसन्धानपरा: कैङ्कर्यतत्परा:। इत्थं
महर्षिभि: प्रोक्ता द्विविधा भागवत्परा:॥२०॥ द्विविधा केवला
बोध्या दुरवभावैकतत्परा:। ऽऽत्मानुभूतिपरमा इति चोक्ता महर्षिभि:॥२१॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
श्रीवैष्णवभेदनिरूपणात्मकःषष्ठप्रश्नोत्तराख्यः

षष्ठः परिच्छेदः ॥६॥

समुच्यते सम्प्रति लक्षणं सन्महात्मनां सद्गुरुवैष्णवानाम्।
विरञ्चिशम्भुश्रितरामचन्द्रपदारविन्दस्थितचेतसां हि॥१॥
धृतोर्द्ध्वपुण्ड्रतुलसीसमुद्भवां दधच्च कण्ठे शुभमालिकां जनः।
तज्जन्मकर्माणि हरेरुदाहरेद् गृहणंश्च नामानि शुभप्रदानि सः॥२॥
सीतापतेः संस्मरणप्रयान्निरन्तरं कृष्णां च गायेत्सुयशोऽङ्कितां मुहुः।
रम्यं तदीयं च चराचरात्मकं पश्यन् सतां सद्गुणमुदारधीश्चरेत्॥३॥

चापादिपञ्चायुधाङ्कितो हि ताङ्कः समीक्ष्य हृष्टश्च हरिप्रियान्यम्।
तथा विधानं भक्तिपरः प्रपूजयेत् सुवैष्णवान् जन्मफलादि संस्तुवन्॥४॥
पञ्चायुधाङ्काङ्कितवैष्णवा ये विप्रा अथ क्षत्रियवैश्यशूद्राः। स्त्रियस्तथाऽन्येऽपि च विष्णुरूपा जगत्पवित्राप्रपवित्रिणस्ते॥५॥
ते सर्वतीर्थाश्रयभूतदेहा देशो महाभागवता वसन्ति। यस्मिन्
स तददर्शनसंस्थितिभ्यां सूते सुपुण्यं निखिलाघशून्यम्॥६॥
तदर्चनात्तत्पदनीरपानात्तत्सङ्गतेस्तत्प्रणतेर्विधानात्। नृणां
हि तच्चिष्टसुभोजनाच्च स्यात्कोटिजन्मार्जितपापनाशः॥७॥
कार्पासकैः सप्तभिरद्भुतैर्गुणैः सुनिर्मितं तत्कटिसूत्रमुत्तमम्।
काषायकं वस्त्रयुगं च धारयेत्तथोर्ध्वपुण्ड्रादिकमेव वैष्णवः॥८॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
श्रीवैष्णवलक्षणनिरूपणात्मकःसप्तमप्रश्नोत्तराख्यः
सप्तमः परिच्छेदः ॥७॥

कार्यो महात्मभिर्नित्यं कालक्षेपो मुमुक्षुभिः। परमात्मपरैरित्थं २७
वैष्णवैरिति वर्ण्यते ॥१॥ प्रातर्मध्याह्नसायं कृतशुचिकृतिभिः
राममभ्यर्च्य सम्यक्, श्रीमद्रामायणेन प्रतिदिनमखिलैर्भार-
-तेन प्रपन्नैः। शक्तैरानन्दभाष्यैरथ च शुभतमाचार्यदिव्य-
प्रबन्धैः कालक्षेपो विधेयः सुविजितकरणैः स्वाकृतेर्यावदन्तम् ॥२॥
स्नानादिकर्माणि विधाय नित्यं ग्रन्थानथन संस्मृणुयादशक्तः।
श्रीरामसन्नामसुकीर्तनं च दूयानुसन्धानमथो विदध्यात् ॥३॥
दिव्येषु देशेषु सतां प्रसङ्गं तदीयकैङ्कर्यपरायणः सन्। यावच्छ-
-रीरान्तमहर्दिवं तत्कथामुदारां शृणुयाद्ध्रुवध्रीम् ॥४॥तत्रा-
-प्यशक्तास्तु कुटीरमात्रं विधाय कुर्युस्त्वथ राघवादौ। ग्रन्थत्र
वासं च गुरूपदिष्टान्मन्त्रान्जपन्तो ह्यभिमानशून्याः ॥५॥भक्त्या-
दियुक्तस्य तथाऽनहङ्कृतेर्महात्मनस्तस्य निदेशपालनम्।
उपायमेनं चरमं निरन्तरं सुवैष्णवोऽयं विदधात्वतन्द्रितः ॥६॥

तदर्थपुष्पप्रचयेन सन्ततं तथैव तन्मन्दिरमार्जनादिना ।
तदीयनामाभ्यसनेन तन्मनाः क्षिपेत्स कालं नितरां गतालसः ॥७॥ २८
तीर्थेसु वासेन सतां महात्मनां समागमेनाथ तदर्चनेन ।
जिज्ञासया तद्यशसः श्रवेण तच्छ्रावणेन स्मरणेन तस्य ॥८॥
रामस्य साङ्गस्य सपार्षदस्य सीतासमेतस्य सहानुजस्य ।
कैङ्कर्यमीर्ष्यारहितः प्रकुर्वन् क्षिपेत् स्वकालं सततं सुभक्तः ॥९॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे कालक्षेपनिरूपणात्मकोऽष्टमप्रश्नोत्तराख्यः

अष्टमः परिच्छेदः ॥८॥

तथाविधैस्तैः परमार्थभूतं सुवैष्णवैः प्राप्यमथोच्यते यत् ।
जितेन्द्रियैरात्मरतैर्बुधाग्र्यैर्महत्तमैः स्वाभिमतार्थदोहम् ॥१॥
श्रीमान् दिव्यगुणाब्धिरौपनिषदो हेतुः शरण्यः प्रभुः देवेशो
जगतामन्तादि निधनो ब्रह्मादि देवार्चितः । तारकोन ल-

चन्द्रमोबहुमद्दः सौदामिनी भासकोऽजय्यो वीरसपत्न-
-शस्त्रनिचयैर्जेता च तेषां मुहुः ॥२॥ नित्यो ब्रह्मविधायकश्च २९
पुरुषो वेदप्रदो ब्रह्मणे नित्यानां शरणं तपःप्रभृतिभिः
सद्योगिनां दुर्लभः। एकश्चेतनचेतनो भूतजगद्ध्येयः
स्वतन्त्रो वशी स प्राप्योऽस्ति मुमुक्षुभिः सुगुरुभिः सत्सङ्ग-
-भिस्तत्परैः ॥३॥ तथाविधं प्राप्यमथो सुवैष्णवः सुचिन्तय-
-न्नित्यमनुक्षणं प्रिय। सदा सदाचाररतं गुरुं वरं ज्ञातं भजे-
-तारिवलसंशयच्छिदम् ॥४॥ सत्सङ्गतः सन् विगतस्पृहो
मुहुरामं प्रपद्याऽथ गुरोर्मुखादसौ। कर्माखिलं सम्परिशुद्ध्य
चाऽऽत्मवान् प्रारब्धमेवं प्रहृतान्यकर्मकः ॥५॥ न्यासात्
स्वतन्त्रेश्वरजातसद्द्यानिर्लूनमायान्वय एव दैशिकः।
हार्दोत्तमानुग्रहलब्धमध्यसन्नाडोशुभद्वारबहिर्विनिर्गतः ॥६॥
मार्गे ततः सोऽर्चिरुपैति मुक्तकस्तथाऽर्चिषोऽहो दिनतः सुरार्चितः।
ऊनार्पूर्यमासैर्विविधैस्तु वासरैः पक्षं प्रभूतोत्तमशर्मविज्वरः ॥७॥

पक्षादुदङ्मासमथो षडात्मकं तेभ्यश्च संवत्सरमन्दतो रविम्।
चन्द्रं ततश्चन्द्रमसोऽथ विद्युतं स तत्र तत्राखिलदेवपूजितः॥८॥
परं पदं सोऽयमुपेत्य नित्यममानवं ब्रह्मपथेन तेन। सायुज्यमेव ३०
प्रतिलभ्य तत्र प्राप्यस्य सन्नन्दति तेन साकम्॥९॥ सीमान्त-
-सिन्ध्वाप्लुत स्व धन्यो गत्वा परब्रह्म सुवीक्षतोऽथ। प्राप्यं महा-
-नन्दमहाब्धिमग्नो नावर्तत जातु ततः पुनः सः॥१०॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
प्राप्यनिरूपणात्मकोनवमप्रश्नोत्तराख्यः
नवमः परिच्छेदः ॥९॥

महामते प्रोच्य तदीयमाप्यं तेषां निवासस्तु निरूप्यतेऽथ। मोक्ष-
-प्रदः शास्त्रसुसम्मतश्च जिज्ञासुबोध्यो मनसावधानः॥१॥
प्रद्वेषतीर्थेषु वसेत् प्रपूजयन् स यत्र यत्राविरभूद् यथा यथा।
तथा तथा तत्र रघूत्तमं जगत्पतिं चतुर्वर्गफलप्रदं हरिम्॥२॥
वैकुण्ठदेशो खलु वासुदेवमामोदसंज्ञे त्वथ कर्मणाऽहम्।

प्रद्युम्नमब्जाक्षमपि प्रमोदे सम्मोद दैशान्तु तथाऽनिरुद्धम् ॥३॥
विष्णुं तु लोके वरसत्यसंज्ञके पद्माक्षमित्थं त्वथ सूर्यमण्डले।
क्षीराब्धिमध्ये शुभशेषशायिनं श्वेते तथा द्वीपवरे च तारकम् ॥४॥ ३१
तथा बदर्याभिध आश्रमे वरे सुरर्षिराजर्षि महर्षिसेविते। नारायणं
लोकनमस्कृताङ्घ्रिकं मुनीशसेव्ये त्वथ नैमिषे हरिम् ॥५॥ शाल-
-ग्राममभोघदिव्यफलदं देवं हरिक्षेत्रतोऽयोध्यायां रघुपुङ्गवं गुण-
-निधिं श्रीरामचन्द्रं प्रभुम्। सत्स्थाने मथुराभिधाश्रमवरे श्रीबाल-
-कृष्णं परं मायायां मधुसूदनं सुरनरध्येयांघ्रिपद्मं सदा ॥६॥
काश्यां भोगिशायं सनातनमथावन्त्यामवन्तीपतिं श्रीमद्द्वार-
-वतीतिनाम्नि शुभदे श्रीयादवेन्द्रं मुदा। रम्ये श्रीव्रजनामके
सुरनतं गोपीजनानां प्रियं ब्रह्मेशादि किरीटसेवितपदाम्भोजं
भुजङ्गाश्रयम् ॥७॥ वृन्दावने सुन्दरनन्दसूनुकं गोविन्दमेवं
त्वथ कालियह्रदे। गोवर्धने गोपसुवेषधारिणं तथा भवद्धोडपि
च पद्ममलोचनम् ॥८॥ शारिं तथा गोमत स्वपर्वते तथा हरिद्वार
मृजुं जगत्पतिम्। तीर्थे प्रयागेवत माधवाभिधं तथा गयायां तु

गदाधरं परम् ॥ ९॥ गङ्गासागरसङ्गमेऽतिशुभदे विष्णुं तथा राघवं
शङ्खद भूरिगुणालये मुनिवृते श्रीचित्रकूटे विभुम्। नन्दिग्राम ३२
उदारकीर्तिनिकरे श्रीराक्षसघ्नं प्रभुंरम्ये श्रीमति विश्वरूपिणमथो
क्षेत्रे प्रभासेऽमले ॥१०॥ श्रीकूर्माऽचल उत्तमे च सदयं कूर्मं सुरे-
-श्वेडितं नीलाद्रौ पुरुषोत्तमं त्वथ महासिंहं च सिंहाचले। श्रीमन्तं
तुलसीवने तु गदिनं सर्वार्थिदं तत्प्रिये क्षेत्रे श्रीकृतशौचके तु
सततं पापापहं चेश्वरम् ॥११॥ श्वेताद्रौ त्वथ सिंहरूपिणमयो
श्रीधर्मपुर्यांतथा योगानन्दमशेषदेवसुनतं श्रीकाकुले तु
प्रभुम्। देवैर्वन्द्यमथान्ध्रनायकमिह श्रीदं तथाऽहोबले
तस्मिन्न श्रीगरुडादिसंज्ञ उचिते देवं हिरण्यार्दनम् ॥१२॥
श्रीविट्ठलं तं किल पाण्डुरङ्गे श्री वेङ्कटाद्रौ तु रमासखं च।
नारायणं श्रीमति यादवाद्रौ नृसिंहमित्थं चटिकाचलेऽपि ॥१३॥
सुरेन्द्रवन्द्यं वरदं त्वहर्दिवं सुनिर्मले श्री शुभवारणाचले।
काञ्च्यां तथा श्री कमलायताक्षकं समर्चनीयं बुधवैष्णवोत्तमैः
॥१४॥

तोताद्रिसंज्ञादिषु वैष्णवोत्तमैरेवं तथा तुङ्गशयादिकं प्रभुम्।
कार्यो निवासो नितरां शुभार्थिभिराराधयद्भिः सकलार्थदा- ३३
-यिनम्॥१५॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीते श्रीवैष्णवमताबजभास्करे
श्रीवैष्णवनिवासस्थाननिरूपणात्मकोदशमप्रश्नोत्तराख्यः
दशमः परिच्छेदः ॥१०॥

सदानुसन्धेयमिमं त्रिकालं मुमुक्षुभिस्तत्परमार्थमित्थम्।
ज्ञात्वा न चैवास्ति सुवेदनीयं जिज्ञासुभिस्तैरवशिष्यमाणम्॥१॥
गुरुद्रुहेनो न शठाय चेदं न नास्तिकायोपदिशेत् कदाचित्।
नावैष्णवायापि रहस्यमेतन्न चाथ दैन्याहतवेदनाय॥२॥
जितेन्द्रियः प्रपन्नः सन् बुधः श्रीजानकीपतिम्। अनुष्ठाय

मतं चेदं परमं स्थानमाप्नुयात् ॥ ३ ॥ रामानन्दप्रोक्तः
श्रीवैष्णवमताब्जभास्करो भवतु । आनन्दभाष्यसोदर ३४
एषोऽन्तस्तमोविनाशाय ॥ ४ ॥

इत्यानन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचर्ययतिराजप्रणीतः
श्रीवैष्णवमताबजभास्करः समाप्तः







जय श्री राम

श्रीवैष्णवमताब्जभास्करः

निदर्शिका

पृष्ठ

१-संक्षिप्त-परिचय	१	२४-शिष्यलक्षण ७-८ श्लोक	३४-
२-आनन्दभाष्यकारजी की परम्परा	६	२५-संस्कारनिरूपण ९-११ श्लोक	३४
३-आनन्दभाष्य	९	२६-भक्तिनिरूपण १२-१४ श्लोक	३५
४-आनन्दभाष्य का मत	११	२७-एकादशी निर्णय १५-२६ श्लोक	३५
५-आनन्दभाष्य प्रतिपाद्य-श्रीरामजी	११	२८-श्रीरामनवमी व्रत निर्णय २७-२९ श्लोक	३७-
६-आनन्दभाष्य एवं सगुणनिर्गुण ब्रह्म	१३-	२९-श्रीजानकी व्रत निर्णय ३० श्लोक	३७
७-आनन्दभाष्य में सद्यमुक्ति निषेध	१४	३०-श्रीहनुमान् व्रत निर्णय ३१ श्लोक	३८
८-सिंहावलोकन	१५	३१-श्रीनृसिंह व्रत निर्णय ३१ ३३ श्लोक	३८
९-संक्षिप्त श्रीमन्त्रराज जपविधि	२०	३२-श्रीकृष्णाष्टमी व्रत निर्णय ३४-३७श्लोक	३८
१०-श्रौतपदार्थ विभाग	२२-	३३-श्रीवामन व्रत निर्णय ३८-४१ श्लोक	३९
११-मङ्गलाचरण श्लोक-१-३	२३	३४-कृपादिभेदनिरूपण ४२-५९ श्लोक	३९
१२-दश प्रश्न श्लोक ४ था	२४	३५-श्रीवैष्णवधर्मनिरूपण १-४ श्लोक	४२
१३-समाधानामृतवचन ५वां श्लोक	२४-	३६-विरक्तवैष्णव विवाहनिषेध ५-१०श्लोक	४३
१४-प्रकृतिनिरूपण ६ ठा श्लोक	२५	३७-अर्चावतारनिरूपण ११-१८ श्लोक	४३
१५-जीवनिरूपण ७वां श्लोक	२५	३८-श्रीवैष्णवभेदनिरूपण १-२१ श्लोक	४४
१६-ईश्वरनिरूपण ८-९वें श्लोक	२६	३९-श्रीवैष्णव लक्षण निरूपण १-८ श्लोक	४७
१७-जप्यरहस्यनिरूपण १ श्लोक	२७	४०-कालक्षेपनिरूपण १-९ श्लोक	४९
१८-मन्त्रराजरहस्यनिरूपण २-२३	२७	४१-प्राप्यनिरूपण १-४ श्लोक	५०
१९-मन्त्ररत्नरहस्यनिरूपण २४-३४	३०	४२-अर्चिरादि मार्गनिरूपण ५-१० श्लोक	५१
२०-चरममन्त्ररहस्यनिरूपण ३५-४४	३१	४३-निवासस्थाननिरूपण १-१५ श्लोक	५२
२१-श्रीरामध्याननिरूपण १-६ श्लोक	३३	४४-ग्रन्थ की फल श्रुति १-४ श्लोक	५५
२२-मुक्तिसाधननिरूपण १-२ श्लोक	३४		
२३-आचार्यलक्षण ३-६ श्लोक	३४		

卐 श्रीरामजी का ध्यान 卐

विकचपद्मदलायतवीक्षणं विधिभवादिमनोहरसुस्मितम् ।
जनकजादृगपाङ्गसमीक्षितं प्रणतसत्समनुग्रहकारिणम् ॥
मुनिमनः सुमधुव्रतचुम्बितस्फुटलसन्मकरन्दपदाम्बुजम् ।
बलवदद्भुतदिव्यधनुः शरामहितजानुविलम्बिमहाभुजम् ॥
परार्ध्यहाराङ्गदचारुनूपुरं सुपद्मकिञ्जल्कपिसङ्गवाससम् ।
लसद्घनश्यामतनुं गुणाकरं कृपार्णवं सद्हृदयाम्बुजासनम् ॥
प्रसन्नलावण्यसुभृन्मुखाम्बुजं जगत् शरण्यं शरणं नरोत्तमम् ।
दयापरं दाशरथि महोत्सवं स्मरामि रामं सह सीताय सदा ॥
द्विभुजस्यैव रामस्य सर्वशक्तेः प्रियोत्तम ? ध्यानमेवं विधातव्यं सदारामपरायणैः ॥

हे सुरसुरानन्द ? विकसित पद्म दल प्रफुल्लित कमलदल के समान आयत लम्बायमान नेत्र-आँख हैं जिनकी, तथा जिनका मनोहर इषत् हास्य ब्रह्मा प्रभृतिक देवगण के मन को भी अतिशय मनोहारी है अर्थात् मोहित करनेवाले। और जिन भगवान् श्रीरामजी का मुखकमल भगवती श्रीसीताजी के कटाक्ष से सतत देखा जाता है। प्रणाम मात्र करने से प्रपन्न व्यक्तियों के ऊपर अनुग्रह करनेवाले। तथा जिन भगवान् का चरणकमल अच्छी तरह से विकसित है तथा मुनिगण के मनरूपी मधुलोभी भ्रमणों से चुम्बित-सदा सेवित है। तथा जो भगवान् आजानुबाहु हैं। तथा एतादृश भुजाओं में अति सामर्थ्य युक्त अद्भुत आश्चर्य कार्यकारी दिव्य लोकोत्तर धनुष तथा बाण विद्यमान हैं। एवं जो भगवान् बहुमूल्य मनोहर कण्ठहार तथा अंगद केयूर विजोंठा, और नूपुर प्रभृतिक अनेक आभूषमों से युक्त हैं। एवं कमल किंजल्क की तरह पीत वस्त्र से सर्वदा सुशोभित हैं, और जिन भगवान् का श्रीविग्रह शरीर आषाढ मासिक नीलमेघ की तरह श्यामल है। जो भगवान् हेय प्रत्यनीक अनन्तकल्याण गुणों का आकार हैं। तथा कृपा का समुद्र हैं इसलिए मुनिलोग इनको दयासागर कहते हैं। भक्त प्रपन्न व्यक्तियों का हृदय कमल ही जिनका आसन है। अर्थात् जो भक्त के हृदय में सदा निवास करते हैं। और जिनका मुखकमल विलक्षण शोभा से सर्वदा युक्त रहता है। तथा जो परमात्मा स्वरूप हैं। और शरणागत व्यक्तियों के रक्षण करने के लिए सर्वदा प्रयत्नशील रहते हैं। वे एक दो व्यक्तियों का ही रक्षण करते हैं ऐसा नहीं किन्तु जगत् मात्र का-सम्पूर्ण जगत् का रक्षक हैं नरोत्तम हैं। दशरथ राजा के पुत्ररूप से अवतार लिया है। जो स्वयं महोत्सवरूप हैं। तथा परम दयालु एवं श्रीसीताजी से सदा युक्त हैं। एतादृश श्रीरामजी का मैं सदा स्मरण करता हूं। हे प्रियोत्तम सुरसुरानन्द ? सर्वशक्तिमान् द्विभुज श्रीरामजी का शुभेच्छु श्रीरामभक्त पुरुष सदा ध्यान करें। तुम भी उन्हीं का ध्यान करो।

॥ जगद्गुरु श्रीरामानन्दाचार्यपीठ ॥

सचित्र धार्मिक मासिक पत्रिका के सम्बन्ध में

प्रकाशक का नाम-	स्वामी श्रीहरिप्रसादाचार्यजी	सम्पादक का नाम-	स्वामी श्रीसीतारामाचार्यजी
राष्ट्रीयता-	भारतीय	राष्ट्रीयता-	भारतीय
	श्रीकोसलेन्द्रमठ, पो. पालडी, अहमदाबाद-३८०००७	पता-	श्रीकोसलेन्द्रमठ, पो. पालडी, अहमदाबाद-३८०००७
प्रकाशन स्थान-	श्रीकोसलेन्द्रमठ, पो. पालडी, अहमदाबाद-३८०००७		दू.६६०१००१

ऊपर लिखा विवरण मेरी जानकारी के अनुसार सत्य है। स्वामी श्रीसीतारामाचार्यजी

१-श्रीवैष्णवमताब्जभास्करः ०१-से-५६ प्रस्तोता-आनन्दभाष्यसिंहासनासीनजी

इन्टरनेट-१-डब्लू डब्लू डब्लू. श्रीरामानन्दसम्प्रदाय. ओ आर जी

२-डब्लू डब्लू डब्लू. आचार्यपीठ. ओ आर जी

Printed metter book post

श्रीरामानन्दाचार्यपीठ श्रीकोसलेन्द्रमठ के धर्मप्रचार विभाग से धर्मप्रचारार्थ प्रकाशित

मुद्रक-श्रीआनन्दभाष्यमुद्रणालय

जगद्गुरुश्रीरामानन्दाचार्यपीठ चौक

प्रा. सं. प्रति श्री.....

४१४ ग्रन्थपाल त्रिभुवन विश्व विद्यालय कीर्तिपुर काठमाण्डु नेपाल
पुस्तकालय वाल्मीकि अध्ययन संस्थान काठमाण्डु नेपाल